# ग्रन्थसमीक्षा

**नारायण दाशः**

**याज्ञसेनी (अनूदितोपन्यासः), ओडियामूललेखिका-डॉ. प्रतिभारायः, संस्कतानुवादकः-डॉ. भागीरथिनन्दः, प्रकाशकः-डॉ. सी. गिरिः, कुलसचिवः, राष्ट्रियसंस्कतसंस्थानम्, ५६-५७, इन्स्टीट्यूशनल एरिया, जनकपुरी, नवदेहली-५८, प्रथमसंस्करणम्-२००६,प.-१/८, क्राउन, १४/४६७, मूल्यम्-२६५.००।**

याज्ञसेनीति उपन्यासः डॉ. प्रतिभारायमहोदयाया मूलतः उत्कलभाषानिबद्धो ज्ञानपीठ–मूर्त्तिदेवीत्यादिपुरस्कारभाक् दशाधिक–भारतीयभाषास्वनूदितपूर्वः सम्प्रति संस्कतभाषया भागीरथिनन्देना नूदितः। आत्मजीवनशैल्याः प्रयोगेण मूललेखिका त्र आविष्करोति द्रौपद्या जीवितसर्वस्वम्, यत्र विषयविन्यासदष्ट्या सम्यक् विन्यस्तो भाषाप्रवाहसातत्येन सततं प्रवहितः शैलीचमत्कारेण च नितरां चमत्कतो गद्यप्रवाहः पुरस्क्रियते, सो न्यत्र विरल एव। जीवनस्य शेषक्षणे स्वजीवनस्य क्षतिं प्राप्तिं च आकलय्य द्रौपदी समग्रमुपन्यासं पत्ररूपेण प्रस्तौति जीवनबान्धवं श्रीकष्णं प्रति। अतः भक्त–भगवतोः अपार्थिवप्रमाणो वाङ्मयीमूर्त्तिः वर्तते याज्ञसेनी। स्वयं लेखिका वदत्याद्याभासे–''याज्ञसेनी विलक्षणं नारीत्वावाहनमेकम्। कर्म–ज्ञान–भक्ति–शक्तीनां मूर्तिमती देवी याज्ञसेनी। कष्णां 'याज्ञसेनी' रूपेण प्रस्तूय मम देशस्य संस्कतादरवतां, पाठकानां विचारभूमिं समुत्पादयितुमहं सङ्कल्पबद्धा।'' (आद्याभासः, प. १३–१५)

इदानीं यावदनूदितेषूपन्यासेषु याज्ञसेनी (प. ४६७,क्राउन), वहत्तमा श्रेष्ठतमापि वर्तते। सार्थः(प. ३३५, क्राउन), धर्मश्रीः(प.३१६क्राउन), आवरणम्(प. २८४डेमी)। समर्थो यमनुसर्जकः प्रतिपदं पारम्परिकशैल्या अनुसजति। पुना रमते मनस्तस्य मूललेखिकायाः भावविश्वे। तेन समपदानुवादेन सह प्रत्यक्षीक्रियते क्वचिदुदात्तभावाः क्वचिद्वा संस्कतीकरणेन क्लिष्टभावबन्धाः। तथापि मूलभावानां पुरस्करणे पुरश्चरणे वा संस्कतभाषामर्यादा कुत्रापि बाधकं न प्रतीयते। यथा–

**आकाशस्य यथा दिर्नास्ति, अन्तो पि नास्ति, समुद्रस्य यथा न वद्धिर्न क्षयः सूर्यस्य यथा नोदयो न चास्तमयः, मनःकामनाया यथा न पूर्णता, न च शून्यता, तथैवावयोः सम्बन्धस्य नास्ति संज्ञा न चोपसंहारः। (प.१)**

(आकाशर येमिति आदि अन्त नाहिं, समुद्रर येमिति क्षय नाहिं, वद्धि नाहिं, सूर्यर येमिति उदय नाहिं, अस्त नाहिं, मनोकामनार सेमिति पूर्णता नाहिं, शून्यता नाहिं, आम सम्पर्कर सेमिति संज्ञा नाहिं, शेषकथा नाहिं..... ओडियामूलम –प.१)

निर्बोधशिशवे क्रीडनकं प्रदाय परस्मिन् क्षणे तस्माद् बलादाकष्य हरणस्यैव सर्वं दत्वा सर्वापरहणस्य कथमिदं प्रहसनम्? यो हस्तौ प्रसार्य याचते, तं प्रतारयितुमुचितम्। परन्तु यः किमपि न याचते, तस्मै प्रतारणमिदं नैष्ठुर्या पिरिक्तं किमन्यत् स्यात्? (प.२)

(निर्बोध पिलाकु खेलणा देइ परक्षणरे छडाइनेइ कन्दाइवा परि, सवु नेइयिवार ए प्रहसन काहिंकि? यिए हातपताइ मागे, ता' संगें खेलिवाकु इच्छा हुए, यिए किछि मागे नाहिं, ता' संगे ए खेलर नाम निष्ठुरता व्यतीत अन्य क' ण होइपारे। ओडियामूलम्–प.२)

मूलात्परिष्कताः कोमलकल्पनाः यथा–

तव नयनयोरश्रुबिन्दुभिरुदितसूर्यस्य लोहिता रश्मयः प्रतिफलितास्तव मुखसौन्दर्यं विवर्धयन्तो श्रुबिन्दूनामपि मूल्यं प्रगुणीकुर्वन्ति, निजमहिमानं च विशेषयन्ति। (प. ४८)

(तम आखिर अश्रुविन्दुरे उदयसूर्यर लोहितरश्मि प्रतिफलित होइ तम मुखर सौन्दर्य वढाइवा संगे संगे सेइ अश्रुविन्दु र मूल्य वढाइछि, पुणि सूर्यरश्मि निजे महिमामय होइछि। ओडियामूलम्–प.४२)

क्वचित् मूलभाषायाः मूलपदानि विसज्य संस्कतरूढपदानि प्रगुणीकुर्वन्ति कष्टकल्पनाः–

नितम्बिनी ममांसे पाणिं न्यधात। (प. २७) ममाध्यहङ्कारं कष्णो वर्त्तते (प. २५०) गतो स्तमर्कः (प.४२१) यशस्विनी भवेति म आशिषः। (प.६२) रात्रिरतिवक्ष्यति (प.८८)।

अस्य विशालग्रन्थस्यानुवादे अपरा समस्या सीत् क्रियापदानि प्रयुंक्ते। यथा–विरज्येरन् (प.६४) मंस्ये, खेत्स्ये (प.१११) क्षोभे (प.११५) दाम्यामि (प.१३३) निचिक्षेप (प.१४१) चीच्चक्रुः (प.१४४) निलिल्ये (प.१४५) गुरुरुत्ततार (प.१४६) व्यजिज्ञपत् (प.१५६) बबन्धिथ (प.२६६) प्रतस्थिरे (प. ३३८) चालिलिंग (प.३५८) मामुद्दध्रुः (प.३८१) क्षंस्यति (प.४१५) उद्दध्रतुः (प. ४२५) नादेक्ष्यामि (प. ४२६) इवाप्राक्षीत् (प.४३५) प्रत्यज्ञासीत् (प.४५५) जज्ञिषे (प.४६५) इत्यादिपदानि ग्रन्थगौरवं, पाठकस्याग्रहं वर्धयन्ति एव।

भाषादष्ट्या तु मूलग्रन्थादपि उत्कष्टो वर्तते अनूदितग्रन्थो यम्। किन्तु मूलस्य सरला, कोमला, सावलीला च भाषा अत्र नास्तीति पुनर्वक्तव्यं नास्त्येव। तथापि न म्रियतां सर्पः, न त्रुट्यतां दण्डः (प.७३) बलं यस्य देशस्तस्य (प.१०७) कष्टं बिना कष्णो न लभ्यते (प.२४६) अनतिक्रमणीयं हि भाग्यलिखितं (प.३०२) परन्तु दुर्योगः सज्ञातिकुटुम्बः समाविशति (प.३४६) क्षते सुधाप्रलेपसमः (प.३६२) इत्यादिरूढयः संस्कतप्रभां विस्तारयन्ति।

ग्रन्थस्यास्य पत्रे–पत्रे वर्णितास्ति अपरूपा प्राकतिकरूपशोभा। काम्यकवनस्य शोभानिरूपणे कविलेखनी मुखरयते पुनः–दीर्घवेणूनां चमत्कारिपटान्तराले सल्लजा कापि किशोरी निलीयमानास्मत् सहास्माभिर्बहुदूराच्चलति। कदाचित् बातेरितवेणुपत्राणां सन्धौ दश्यते तस्याः क्षीणाच्छन्दोमयी तनुवल्लरी, परक्षणे चारण्यस्य हरित्पटान्तरिता निलीयते।

अस्य सुन्दरं मुद्रणं, बन्धनं, मुखपष्ठं चाकर्षन्ति पाठकसमाजम्। तथापि सामर्थ्यमिस्ति (प.५४) पविरस्य (प.६२) पाण्डवाः.... स्थातुमिच्छति (प.११०) उर्मिला (प. ११४) कुरवंशस्य (प.११८) शुभच्छां (प. १२१) त्वक्त्वा (प.१२७) प्रतिस्थापयितुं (प.१४२) कुर्वन्ती (प.२०८) जिघ्राति (प.२२८) किरतानां (प.३१५) महियसीं (प. ३५१) सा रंजितवान् (प.३७१) इत्यादिमुद्रात्रुटयः रसास्वादवाधकाः सन्ति।

सामग्रिकतया ग्रन्थो यं इदानीं यावत् प्रणीतानामनूदित–ग्रन्थानामादर्शस्वरूपं प्रस्तौतीति वक्तुं शक्यते। व्याकरणनियमपालने, भाषामर्यादासंरक्षणे, क्रियापदाहरणे, मूलभावविशदीकरणे, याज्ञसेन्याः सामाजिकस्वरूपनिरुपणे, किं बहुना संस्कतानुवादस्य मानकरूपप्रदाने उपन्यासो यं सहृदयसमाजस्य मुकुटमणिरिव विराजतेतराम्।

*संस्कतविभागः*
*रामकष्णमिशन आवसीयमहाविद्यालय,*
*नरेन्द्रपुरम् कोलकात्ता १०३*

---000---